Postal Regd.No. GAMC- 1553/2025-2027

ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १९ अङ्क : २२८
ॲप्रिल - २०२५

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2025-2027 issued by SSP Ahmedabad. Valid upto 31-12-2027. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### विषस्य वाणिज्यम्

कश्चित् चोरः केरलराज्यस्य कञ्जीकोडेग्रामे गृहीतः। तस्य हस्ते यत् द्रव्यम् आसीत् तत् सामान्यः लोकः अवैधं (illegal) नैव मन्यते। द्रव्यम् आसीत् सर्पविशेषस्य नागस्य विषम्। चोरस्य हस्तात् यत् विषं प्राप्तम्, तस्य प्रमाणम् अपि केवलं २०० मीलीलीटरमितम्। एतस्य सर्पस्य अल्पमात्रं विषं प्राणहरं भवति। तस्य सङ्ग्रहे कः मतिं कुर्यात् ? तथापि ज्ञातव्यम्, गृहीतस्य २०० ml विषस्य मूल्यं द्विकोटिरूप्यकाणि इति। एतद् वाणिज्यं भारतस्य प्रच्छन्नेषु स्थानेषु महता प्रमाणेन वर्तते। तत्रापि केरलस्य चोरैः सकलस्य सर्पसृष्टेः निर्मूलनं प्रतिज्ञारूपेण इव आचर्यते। प्रतिवर्षं नैके सर्पाः विषे हन्यन्ते। वस्तुतः भारतीयशासनस्य अत्र अनुमतिः नास्ति। तमसि एव जायते सर्वविधा कपटलीला।

आयुर्वेदानुसारं विषस्य उचिता मात्रा केषुचित् रोगेषु लाभाय कल्पते। परन्तु चोरितं विषं विदेशं प्रति प्रेष्यते। तत् प्रेषणं तु औषधार्थं नैव। तत्र विषस्य उपयोगः मादकद्रव्याणां निर्माणे क्रियते। थाईलेण्ड-ताईवानप्रभृतयः देशाः विषस्य ग्राहकाः वर्तन्ते। किञ्चित् च विषं युरोपदेशेषु अपि प्रेष्यते। 'इण्डियन वाईल्ड लाईफ एक्ट-१९७२' अनुसारं खलु अनुज्ञां विना सर्पविषस्य सङ्ग्रहः अवैधः अस्ति। तस्य साहसिकः सप्तवर्षाणि बन्धनम् अर्हति। तेन सह २५००० रूप्यकैः सः दण्ड्यः अपि भवति। भारते नैके नयाः वर्तन्ते। तेषु एकतमः एषः (वाईल्ड लाईफ एक्ट) नयः अपि केवलं शास्त्रेषु दृश्यते, आचारे न।

एवं भारते कोऽपि जन्तुः मनुष्यस्य स्वार्थपाशात् मुक्तः नास्ति। सर्पाणां हिंसा तु महता प्रमाणेन स्यात्, यतो हि केचन सर्पविशेषाः प्रत्येकं दंशेन केवलं ४०-६० माईक्रोग्राममितं विषम् उत्सृजन्ति। अन्यत्र विदेशेषु तस्य आवश्यकता महता प्रमाणेन भवति। अतः सर्पाणां ग्रहणं मारणं च कल्पनातीतं स्यात् इति तर्कयितुं शक्यते। अस्मिन् विषये अतीव तुच्छम् आश्वासनम् एकमेव दृश्यते। भारते सर्पदंशेन बहूनां मनुष्याणां मृत्युः भवति। गच्छता कालेन तस्य प्रमाणं न्यूनं भविष्यति।

## वेणुवादनस्य चमत्कारः

✍ रजतकुमारत्रिपाठी

नूतुङ्गविद्यालयस्य प्राचार्यः स्वप्रकोष्ठे उपविश्य सकृत् दृष्टिं प्रसारितवान् भित्तिघटीदिशि । अपराह्णस्य एकवादनम्। भोजनसमयः सः । किन्तु भोजनविरामस्य घण्टानादः तेन न श्रुतः । 'किम् एषः घण्टावादकः स्वकर्तव्यं विस्मृतवान् ?' इति चिन्तयन् सः क्षणं यावत् क्षुब्धः अभवत्।

अनन्तरक्षणे एव तेन कश्चन मधुरः वेणुनादः श्रुतः । तदनु एव घण्टानादः अपि अभवत्। छात्राः विरामानन्दम् अनुभोक्तुं कक्ष्याभ्यः बहिः आगताः । तेषु केचन छात्राः विद्यालयपरिसरे वृक्षस्य अधः स्थितं नववर्षीयं बालकं परितः स्थितवन्तः ।

सः बालकः अस्ति वेणुविक्रेता राधाप्रियः । प्रतिदिनं सः मध्याह्ने तत्र आगच्छति । तस्य वेणुनादस्य आरम्भेण विद्यालयस्य घण्टानादकः भोजनविरामस्य कालः जातः इति स्मरन् घण्टानादं करोति स्म । घटीदर्शनेन समयज्ञानं परित्यक्तम् आसीत् तेन। राधाप्रियस्य, घण्टानादकस्य च एषः सम्बन्धः सामान्यः जातः आसीत्।

राधाप्रियः स्ववेणुनादेन छात्रेषु बहून् अभिमानिनः सम्पादितवान् आसीत्। केचन भोजनसमये पाथेयम् अपि तस्मै यच्छन्ति स्म। एतत् शिक्षकाणां प्रीतये न अभवत्। तादृशेषु चतुर्थीकक्ष्यायाः अध्यापकः श्रीमित्रः अपि अन्यतमः। वेणुनादेन राधाप्रियः कोलाहलं जनयन् छात्राणाम् एकान्तं नाशयति इति विचिन्त्य सः प्राचार्यम् एतं विषयं न्यवेदयत्।

प्राचार्यः कुपितः सन् राधाप्रियस्य समीपं गत्वा – 'सर्वे अन्तः गच्छन्तु' इति सर्वान् छात्रान् आदिश्य राधाप्रियं सक्रोधम् अवदत् – ''बहिः गच्छ। पुनः न आगच्छ एतस्यां दिशि'' इति।

राधाप्रियः कतिचन दिनानि विद्यालयसमीपं न आगतवान् वेणुविक्रयणाय। तस्य अनुपस्थित्या घण्टावादकः भोजनविरामस्य घण्टानादे विशेषावधानं न दत्तवान्।

वेणुनादश्रवणेन कञ्चित् समयं वा ये छात्राः हृष्टाः भवन्ति स्म ते अवसरच्युतितः नितरां खिन्नाः आसन्।

अथ कदाचित् अतिमधुराः नादतरङ्गाः वेणोः निर्गत्य छात्राणां कर्णं प्राविशन्।

तत्समये एव भोजनविरामस्य अपि घण्टा नादिता । हृष्टाः छात्राः सवेगं तत्र धावितवन्तः यत्र राधाप्रियः स्थितवान् आसीत्। तस्य वेणुविक्रयणं सम्यक् प्रवृत्तम्। वेणुः कथं वादनीयः इति सः छात्रान् बोधयन् आसीत्।

श्रीमित्रः तस्य एतत् प्रत्यागमनम् असहमानः प्राचार्यसमीपं गत्वा विषयं सूचितवान्।

प्राचार्यः राधाप्रियसमीपम् आगच्छत् । तस्य उपस्थित्या तं परितः विद्यमानः छात्रसमूहः झटिति ततः अदृश्यः अभवत्। तत्रैव स्थितानां केषाञ्चन छात्राणां समक्षे प्राचार्यः राधाप्रियं कपोले प्रहृतवान्।

क्षणं यावत् स्तम्भीभूतस्य राधाप्रियस्य नेत्रभ्याम् अश्रुधारा निर्गता। प्राचार्यः कोशात् धनपत्रं स्वीकृत्य तस्मै दातुम् उद्युक्तः अभवत्। तदा राधाप्रियः विनयेन एव एतत् निराकृत्य – ''श्रीमन्! अस्य एव विद्यालयस्य छात्रः आसम् अहं तृतीयकक्ष्यायाम् । अपघातकारणतः मम मातापितरौ दिवङ्गतौ । तदनन्तरम् अध्ययनम् अनुवर्तयितुम् अहं न शक्तः । निर्गतिकेन मया जीवनाधारं वेणुविक्रयणम् आरब्धम्। अहं मम विद्यालयं विस्मर्तुं न शक्नोमि। छात्रस्नेहम्

अपि त्यक्तुं न इच्छामि। एतेन एव कारणेन अत्र पुनः आगमनसाहसं कृतं मया। कथम् अहं विद्यालयात् दूरे स्थातुं शक्नुयाम्? मम आगमनं भवतां क्लेशाय भवति चेत् अहं दूरं गच्छामि'' इति रुदन् अवदत्।

राधाप्रियस्य कथनस्य श्रवणेन प्राप्तानुकम्पः प्राचार्यः मूकवत् स्थितस्य श्रीमित्रस्य मुखम् अपश्यत्। ततः सः राधाप्रियं सान्त्वयन् – ''राधाप्रिय! क्षाम्यतु भवान्। भवान् अस्माकं विद्यालये एव अध्ययनस्य अनुवर्तनं कर्तुम् अर्हति। श्वः आगच्छतु। चतुर्थकक्ष्यायां योजयिष्यामि भवन्तम्'' इति अवदत्।

अनन्तरदिने प्रातः प्रार्थनासमये उपस्थितस्य राधाप्रियस्य कोशे वेणुं दृष्ट्वा प्राचार्यः तम् अवदत् – 'प्रार्थनागीतं वादयतु' इति। ततः आरभ्य प्रार्थनारम्भे तस्य वेणुनादश्रवणभाग्यं दैनन्दिनं जातम्।

## वलयविक्रेता मणिकण्ठः

ए.सि. रूपिणी

रामपुरीयः मणिकण्ठः वलयविक्रयणेन जीवनं यापयति स्म। प्रातः एव उत्थाय वलयबन्धं स्कन्धे आरोप्य ग्रामान् प्रति गच्छति स्म सः। द्वित्रेषु ग्रामेषु अटित्वा वलयान् विक्रीय तेन सायं गृहं प्रत्यागम्यते स्म।

तेन विक्रीयमाणाः वलयाः उत्तमाः भवन्ति स्म। योग्यमूल्यकाः अपि। अतः एव बहवः तस्मात् एव वलयान् क्रीणन्ति स्म। मणिकण्ठः गृहात् प्रस्थानात् पूर्वं ग्राम-देवतायाः पूजां करोति स्म। सायं प्रत्यागत्य अपि देव्याः पूजाम् अवश्यं करोति स्म सः। प्रतिदिनम् इव ग्रामेषु वलयान् विक्रीय सः गृहम् आगतवान्। पूजां समाप्य भोजनं कृत्वा सः शयनम् अकरोत्। मध्यरात्रे द्वारताडनं कृतं केनापि। गभीरनिद्राकारणतः मणिकण्ठेन स च शब्दः न श्रुतः। द्वारताडन-शब्दः अनुवृत्तः एव। तस्मात् जागरणं प्राप्य सः द्वारम् उद्घाट्य बहिः अपश्यत्। तत्र कोऽपि न दृष्टः। ''मणिकण्ठ! किं मम हस्ते वलयाः धार्येरन् भवता?'' इति स्त्री-ध्वनिः श्रुतः। उभौ हस्तौ अपि तेन दृष्टौ। वलयधारणम् अङ्गीकृत्य मणिकण्ठः गृहस्य अन्तर्भागतः वलयान् आनीय तयोः हस्तयोः धारितवान्। ततः तौ हस्तौ अदृश्यतां गतौ।

अनन्तरदिने अपि द्वारताडनशब्दः श्रुतः। यदा तेन द्वारम् उद्घाटितं तदा वलययुक्तौ उभौ हस्तौ दृष्टौ। ''मम हस्तौ वलयैः शोभेते ननु?'' इति ध्वनिः श्रुतः। ''आम्। नितरां शोभेते तौ'' इति अवदत् मणिकण्ठः। ततः हस्तौ अदृश्यौ जातौ। मणिकण्ठः पुनरपि निद्रां कृतवान्। तृतीये अपि दिने मध्यरात्रे द्वारताडनशब्दः श्रुतः। नेत्रे मार्जयन् बहिः आगतः मणिकण्ठः अपृच्छत् – ''आर्ये! भवती का? प्रतिदिनं किमर्थं भवती माम् उत्थापयति?'' इति।

''मणिकण्ठ! अहं का इत्यत्र जिज्ञासा मास्तु। भवता वलयाः धारिताः यत् तदर्थं प्रतिफलं दातुम् इच्छामि अहम्। किम् इच्छति भवान्? प्रार्थ्यताम्'' इति अवदत् सः स्त्रीकण्ठः।

''किं प्रार्थयानि अहम्? ग्रामेषु अटनाय वाणिज्यनिर्वर्तनाय च शक्तिः दीयताम्। परिश्रमपूर्वकं जीवनाय पत्नीपुत्रादीनां पोषणाय च सामर्थ्यं दीयताम्। मम पत्नी गुणवती, पुत्राश्च विधेयाः। ते सर्वे सन्तोषेण जीवेयुः इत्येव मम इच्छा'' इति अवदत् मणिकण्ठः। ''मणिकण्ठ! भवतः उत्तमता एव भवन्तं रक्षिष्यति। सकुटुम्बं सुखेन जीवतु भवान्'' इति उक्त्वा ग्रामदेवी सकृत् दर्शनं प्रदाय ततः अदृश्यतां गता।

## स्वप्नवासवदत्तम् ( ग्रन्थपरिचयः )

व्योम शाहः

अनुवर्तते....

यौगन्धरायणः राज्यरक्षणार्थं मगधराजस्य एव साहाय्यं हितकरं विज्ञाय तस्य भगिन्या सह उदयनस्य विवाहः इति एकम् एव विकल्पं पश्यति स्म। वासवदत्तायाम् अनुरक्तः उदयनः अन्यस्यां युवत्यां न स्निह्येत् मगधराजः च परिणीतेन राज्ञा सह स्वभगिनीं न परिणाययेत्। यौगन्धरायणः अत्र वासवदत्तायाः साहाय्येन एकम् आयोजनम् अकरोत्। सः उदयनं लावाणकं प्रति प्रेषितवान् स्वयं च वासवदत्तया साकं प्रच्छन्नवेषः सन् वत्सदेशाद् विनिर्गतवान्। तत्र नगरे तेन प्रवादः प्रसारितः यत् तौ आयतनदाहे दग्धौ मृतौ च। नाटकस्य प्रारम्भः मगधदेशस्य राजगृहनगराद् अदूरस्थिताद् आश्रमाद् भवति यत्र यौगन्धरायणः ब्राह्मणवेषधारी वासवदत्ता च तस्य भगिनी, प्रच्छन्नवेषधारिणी।

**नाटकम्** – उत्सारणापूर्वकं कञ्चुकीयः प्रविश्य आश्रमस्य तपस्विनं (ब्राह्मणवेषधारिणं यौगन्धरायणं) महाराजदर्शकस्य भगिन्या पद्मावत्या मेलयति तस्याश्च आश्रमपदे वासः कल्प्यः इत्यपि निवेदयति। वासवदत्तायाः अपि तां दृष्ट्वा भगिनीतुल्यः स्नेहः आविर्भवति।

तापसीप्रभृतिभिः आश्रमवासिभिः पद्मावती परिचयं तनोति। तदा कञ्चुकीयः उद्घोषयति यत् तत्रस्थानाम् आश्रमवासिनां किम् ईप्सितम् इति कथयतु। प्रायेण सर्वे तुष्टाः एव आसन्। यौगन्धरायणः तदा ‘‘अहम् अर्थी प्रतिवचनपूर्वकं स्वसारं परिपालयितुं पद्मावतीं याचते। पद्मावती अपि अङ्गीकरोति।

अथ कदाचित् कश्चिद् ब्रह्मचारी लावाणकात् समागतः। स्थानस्य नाममात्रं श्रुत्वा वासवदत्ता विह्वला भवति। सः ब्रह्मचारी यौगन्धरायणं लावाणके उदयनस्य मन्त्रिणः यौगन्धरायणस्य प्रियायाः च वासवदत्तायाः दहनं विज्ञापयति। मृगयार्थं गतः उदयनः यदा प्रतिनिवर्तते तदा सोऽपि तस्मिन्नेव दग्ध्वा मर्तुम् इच्छति स्म। एतत् सर्वं श्रुत्वा वासवदत्ता शोकाकूला। ब्रह्मचारी अग्रे कथयति यत् मन्त्रिणः राजानं प्रत्यवस्थापयितुं महान्तं प्रयत्नं कुर्वन्ति। तेषु मन्त्रिषु रुमण्वान् महद् भारं वहति। स्थानस्य अतिपरिचयात् सर्वेषु स्थानेषु राजा वासवदत्तां स्मरति विलपति च। अमात्याः महता यत्नेन राजानं ग्रामात् निरगमयन्। ततः सः ग्रामः शून्यः इव भाति स्म।


एतं सर्वमपि वृत्तान्तं शृण्वतीं वासवदतां पद्मावती पर्यनुकूलयति। ततः ब्रह्मचारी निष्क्रामति। यौगन्धरायणोऽपि निर्गच्छति। इह प्रथमाङ्कस्य समाप्तिः भवति।

द्वितीयाङ्कस्य प्रवेशके विज्ञप्यते यत् पद्मावती वासवदत्तादिभिः सह माधवीलतामण्डपे कन्दुकेन क्रीडति। अङ्कस्य प्रारम्भः कन्दुकेन क्रीडन्तीभिः सखीभिः सह संलापं कुर्वत्या वासवदत्तया भवति। वासवदत्ता पद्मावतीम् उपहसति यत् सा शीघ्रमेव महासेनः इत्यपरनामवतः प्रद्योतस्य वधूः भविष्यति। तदैव चेटी कथयति यत् पद्मावत्याः वत्सराजस्य उदयनस्य कृते महान् अनुरागः, तस्य सानुक्रोशत्वात्। चेटी पृच्छति – ‘‘यदि स विरूपो भवेद्’’ इत्युक्ते वासवदत्ता कथयति यत् सः नूनं दर्शनीयः। तदैव काचिद् धात्री प्रविश्य निवेदयति यत् पद्मावती उदयनाय प्रदत्ता इति। एतत् श्रुत्वा वासवदत्ता महान्तं खेदं वहति। धात्री ततः स्पष्टीकरोति यद् अन्यप्रयोजनेन आगताय स्वयमेव महाराजेन सा वयादिभिः अनुरूपाय उदनाय सा समर्पिता। अद्यैव नक्षत्रं मङ्गलम् अतः कौतुकमङ्गलविधानमद्य करणीयम् इत्यपि पद्मावत्यै निवेदितम्।

( क्रमशः... )


# मासवार्त्ताः

**सम्पन्नः संस्कृतभाषाशिक्षणस्य वर्गः**




संस्कृतभाषायाः अध्ययनं कर्तुम् इच्छुकानां संस्कृतरसिकानां कृते एकलव्य-संस्कृत- एकेडेमीसंस्थानेन संस्कृतभाषाशिक्षणस्य विविधस्तरीयाः अभ्यासक्रमाः आयोज्यन्ते । उपक्रमेऽस्मिन् जनवरीमासस्य ३ दिनाङ्कतः मार्चमासस्य ३१ दिनाङ्कं यावत् संस्कृतभाषाशिक्षणस्य प्रथमस्तरस्य चतुर्थस्तरस्य च अभ्यासक्रमः प्राचलत् । अभ्यासक्रमेऽस्मिन् ३८ छात्राः संस्कृतभाषायाः अध्ययनम् अकुर्वन् । डॉ. मिहिरः उपाध्यायः छात्रेभ्यः मार्गदर्शनं प्रायच्छत् ।

**सम्पन्नाः 'Value Education through Sanskrit' बालसंस्कृतवर्गाः**



बालकाः संस्कृतभाषायाः माध्यमेन भारतीयसंस्कृतेः परिचयं प्राप्नुयुः इति लक्ष्यीकृत्य एकलव्य-संस्कृत एकेडेमीसंस्थानेन 'Value Education through Sanskrit' बालसंस्कृतवर्गाः इति अभ्यासक्रमः सञ्चाल्यते । अभ्यासक्रमेऽस्मिन् Skg तः ९ कक्ष्यायाः छात्राणां कृते संस्कृतपाठनस्य उत्तमा व्यवस्था कल्पितास्ति । एतेन अभ्यासक्रमेण बालेषु विविधाः क्षमताः तद्यथा उच्चारणशुद्धिः स्मरणशक्तेः विकासः, व्यक्तित्वविकासश्च वर्धिताः भवन्ति । अभ्यासक्रमोऽयं मार्चमासस्य ३० दिनाङ्के सम्पन्नः । अभ्यासक्रऽमेस्मिन् श्रीमती सङ्गीता मिस्त्री, श्रीमती अमी गोहेलः, श्रीपारुलः व्यासः श्रीरागिणी गोवाडिया, श्रीऋषिकेशः उपाध्यायः च छात्रेभ्यः मार्गदर्शनं प्रायच्छन् ।

## कृपया हसन्तु

**रमणः - (नमनम् उद्दिश्य) रिक्तोदरः त्वं कति कदलीफलानि खादितुं शक्नोषि ?**

**नमनः - (क्षणं विचिन्त्य) अहं षट् कदलीफलानि खादितुं शक्नोमि ।**

**रमणः - (हसन्) अयोग्यम् उत्तरं मित्र, एकस्य कदलीफलस्य खादनानन्तरं तवोदरं कुतः रिक्तं भविष्यति ? अतः रिक्तोदरः त्वं सर्वदा एकमेव कदलीफलं खादितुं शक्नोषि इति सर्वदा स्मर...।**

★ ★ ★ ★ ★

**द्विचक्रिकां घट्टयित्वा नमनः रमणम् अवदत् - "भवान् अतीव भाग्यशाली वर्तते ।" एतत् श्रुत्वा कोपेन रमणः - "भोः द्विचक्रिकां मया सह घट्टयित्वा मां पातयित्वा पुनः कथयसि यत् त्वं भाग्यशाली असि ?"**

**नमनः - आम्... आम्... भवान् सत्यमेव भाग्यशाली अस्ति, यतोहि अद्य मम अवकाशः अस्ति अतः अहं द्विचक्रिकां चालयन् अस्मि, अन्यथा तु अहं प्रतिदिनं ट्रकयानं चालयामि ।**

★ ★ ★ ★ ★

**रमा तारा च बसयाने उपवेशनस्थानस्य कृते कलहं कुर्वत्यौ आस्ताम् । तदैव चिटिकापर्यवेक्षकः तत्र आगत्य अकथयत्, किमर्थं वृथा कलहं कुरुतः भवत्यौ ? अहं समाधानं वदामि ध्यानेन श्रृणुताम् - 'भवत्योः यस्याः वयः अधिकं सा उपविशेत् ।' अहो आश्चर्यम् उभेऽपि स्थित्वा प्रयाणं कृतवत्यौ ।**

## सुभाषितम्

**– संस्कृतविकिपीडियाजालस्थानात्**

**रविचन्द्रौ घना वृक्षा नदी गावश्च सज्जनाः ।**
**एते परोपकाराय युगे देवेन निर्मिताः ॥**

**तात्पर्यम्** – लोके परोपकारार्थं सर्वस्मिन् युगे देवः सूर्यं चन्द्रं मेघान् वृक्षान् नदीः धेनुः च निर्मितवान्।

**रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।**
**विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥**

**तात्पर्यम्** – रूपेण यौवनेन च युक्ताः उत्तमकुले सञ्जाताः अपि जनाः विद्याविहीनाः यदि भवेयुः तर्हि ते गन्धरहितानि किंशुकपुष्पाणि इव न शोभन्ते । विद्या एव वस्तुतः व्यक्तेः शोभां वर्धयति । विद्याविहीनाः पुरुषाः तु सुगन्धविहीनानि पुष्पाणि इव आकर्षणरहिताः भवन्ति।

**लोकोत्तरं चरितमर्पयति प्रतिष्ठा पुंसां कुलं न हि निमित्तमुदारतायाः ।**
**वातापितापनमुनेः कलशात्प्रसूतिः लीलायितं पुनरगाधसमुद्रपानम् ॥**

**तात्पर्यम्** – पुंसां लोकप्रसिद्धिः तेषां कुलं कारणं न भवति। तेषां कार्यमेव लोकत्तरप्रसिद्धये कारणं भवति। वातापितापनमुनिः कलशात् जन्म प्राप्तवान्। अथापि तस्य समुद्रजलपानमेव तस्य प्रसिद्धये कारणम् अभवत्। वीराणां कार्यमेव तेभ्यः कीर्तिं प्रापयति।

## ज्ञानसरित्

श्यामः पटेलः



**ध्रुवप्रदेशीयः ऋक्षः** – पृथिव्याः हिमाच्छादिते ध्रुवप्रदेशे मनुष्याः तु न वसन्ति, किन्तु काश्चन पशुप्रजातयः निवसन्ति । ये निवसन्ति तेषु अपि अनेकाः विशेषताः भवन्ति । तेभ्यः पशुभ्यः अन्यतमः अस्ति – ध्रुवप्रदेशीयः ऋक्षः । प्रायः अस्माभिः कृष्णवर्णीयः ऋक्षः तु दृष्टः स्यात् । किन्तु अयम् ऋक्षः श्वेतः भवति । आमिषभक्षिपशुषु एषः बृहत्तमः अस्ति । शैत्यात् प्राणरक्षार्थं अस्थिपञ्जरस्य उपरि १० सेन्टीमीटरमितस्य चर्मणः प्रकृतिप्रदत्तम् आवरणं भवति । ध्रुवीयः ऋक्षः यदा उत्थितः भवति तदा प्रायः ११ फूटपरिमितस्य भवति । तस्य शरीरभारः ६५० किलोग्राममितः भवति । एषः ध्रुवप्रदेशस्य शीतलजलयुक्ते समुद्रे स्थितासु हिमशिलासु वसति । आजीवनं हिमस्य उपरि एव जीवन् ऋक्षः प्रतिघण्टं २५ किलोमीटरमितस्य जवेन धावितुं समर्थः । यतो हि तस्य पादानां तले अपि लोमानि भवन्ति । शीतप्रदेशे जीवते ऋक्षाय ईश्वरेण नैकाः विशेषताः दत्ताः सन्ति । तस्य शरीरस्य घर्मः शरीरात् बहिः न निर्गच्छेत् तदर्थं तस्य कर्णौ ह्रस्वौ लघू च भवतः । अतः सः सम्यक् श्रोतुं न शक्नोति, किन्तु नासिकया आमिषस्य मत्स्यस्य च गन्धं दूरात् घ्रातुम् अर्हति ।

अस्य चर्म कृष्णवर्णीयं भवति । अतः घर्मस्य ग्रहणं करोति । तस्य चर्म श्वेतलोमभिः सम्पूर्णतया आच्छादितं भवति । किन्तु तस्य सूक्ष्माणि लोमानि सुषिरवद् भवन्ति । येन सूर्यस्य प्रकाशः लोमभिः प्रविश्य शरीरे घर्मं वर्धयति ।

ऋक्षः – bear

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **ऊहः** | तर्कना | reasoning |
| **विचारी** | विचरण करनेवाला | wanderer |
| **स्त्यानम्** | स्निग्ध | unctuousness |
| **गृध्रः** | गिद्ध | vulture |
| **अनादरः** | अनादर | disregard |
| **सरलः** | सरल | simple |
| **उद्भासुरः** | देदीप्यमान | radiant |
| **अङ्गारः** | अंगार | charcoal |
| **अकाण्डम्** | आकस्मिक | sudden |
| **यादस्पतिः** | समुद्र | ocean |
| **निद्रालुः** | निद्राशील | sleeping |
| **दावः** | वनाग्नि | forest-conflagration |
| **शोणितम्** | रक्त | blood |
| **श्वभ्रम्** | रन्ध्र | hole |
| **पाण्डुरः** | शुक्ल | white |

## किं भवन्तः जानन्ति ?

**१ ) गौतमबुद्धेन कस्याः नद्याः तटे बोधः प्राप्तः आसीत् ?**

(क) गङ्गानद्याः (ख) यमुनानद्याः (ग) सरयूनद्याः (घ) निञ्जनायाः

**२ ) कावेरीनदी कस्मात् राज्यात् प्रवहति ?**

(क) कर्णाटकात् (ख) बिहारात् (ग) गुजरातात् (घ) उत्तरप्रदेशात्

**३ ) द्वारकानगरं कं पर्वतं निकशा स्थितम् आसीत् ?**

(क) विन्ध्याचलम् (ख) मेरुम् (ग) रैवतकम् (घ) ऋष्यमूकम्

**४ ) हस्तिनापुरं कस्याः नद्याः तटे स्थितम् आसीत् ?**

(क) गङ्गानद्याः (ख) यमनुनानद्याः (ग) सिन्धुनद्याः (घ) कृष्णानद्याः

**५ ) दिल्ली, मथुरा, आगरा च कस्याः नद्याः तटे वर्तन्ते ?**

(क) गङ्गायाः (ख) कावेर्याः (ग) व्यासस्य (घ) यमुनायाः

**६ ) भारतस्य विशालतमा नदी का वर्तते ?**

(१) ताप्ती (२) सतलुज (ग) ब्रह्मपुत्र (घ) यमुना

**७ ) का नदी भारतस्य पाकिस्थानस्य च भूक्षेत्रात् प्रवहति ?**

(क) यमुना (ख) हुगली (ग) सिन्धुः (घ) कृष्णा

उत्तराणि – (१) घ (२) क (३) ग (४) क (५) घ (६) ग (७) ग

## अस्माकम् आगामिकार्यक्रमाः

Learn...
SANSKRIT
with fun ...

EKLAVYA SANSKRIT ACADEMY

**Eklavya Sanskrit Academy**
**present**

# SANSKRIT SUMMER CAMP

**for children**
**(Class SKg to 8)**

**From 01/05/2025 to 11/05/2025**
**Daily 10 AM to 11.30 AM**
**Fees: ₹ 3000/-**

**Why learn Sanskrit?**

Sharpens memory
Cures speech disorders
Improves pronunciation ability
Develops communication skills
Increases awareness about Indian Traditional Wisdom

**Contact :**
Dr. Mihir Upadhyay
+(91) 098246 16237

**Venue:**
Core House,
Off CG Road, Ah'bad

---

EKLAVYA SANSKRIT ACADEMY

**Online / Offline**
**Admission Open**

# संस्कृतभाषाशिक्षणम्

### First Level

| | | |
|---|---|---|
| **Date** | : | 11/04/25 to 30/06/25 |
| **Day** | : | Mon-Wed-Fri |
| **Time** | : | 6:30pm to 8:00pm |
| **Fees** | : | 6000/- |

### Second Level

| | | |
|---|---|---|
| **Date** | : | 07/04/25 to 30/06/25 |
| **Day** | : | Mon-Wed-Fri |
| **Time** | : | 7:00am to 8:30am |
| **Fees** | : | 6000/- |

---

संस्कृत-
## साम्प्रतम्

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | – 100 |
| द्वैवार्षिकं रू | – 175 |
| त्रैवार्षिकं रू | – 250 |
| अङ्कमूल्यं रू | – 10 |

---

**Learn Online**

# संस्कृतव्याकरणम्

(Class 9 - 10)

| | | |
|---|---|---|
| **Date** | : | 01/05/2025 to 13/05/2025 |
| **Day** | : | Daily (Sat-Sun off) |
| **Time** | : | 08:00 am to 9:30 am |
| **Fees** | : | Rs. 4000/- |

**contact: Dr Mihir Upadhyay, 98246 16237**

---

**प्रियवाचकाः**

- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

---

EKLAVYA SANSKRIT ACADEMY
||जयतु संस्कृतं जयतु भारतम्||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006